# Shri Raghavendra Stavaratnamala

श्री राघवेंद्र मुनिवारेंद्र संविनुतमारारिमस्तकनदी –
पूरामलोत्तमसुगीराशिवादिमदवारापहारकगुरो |
घोराभिधानगमनिवारैकदीक्षपरमाराधितांघ्रियुगलं
श्रीरामचंद्रमलमाराधयन् व्रतिवराराध्य मामव सदा ||1||

मंत्रालयोल्लसित तंत्राळिदीपकर मां त्राहि सर्वसुगुरो
संत्रातसन्निकर मां त्रातुमत्र किमु मंत्रांबुधे न हि बलम् |
तंत्रं हरेर्जगदंतंत्रो~स्य सो~यमिति तंत्रोक्तिभिः कुमतिनः
संत्रासयन्निखिलयंतृसुनेरितसुतंत्रादिभावविदल ||2||

श्यामावदातशुभरामांघ्रिसारससुधमायमानहृदयं
को मानवो भजति नामानपापहरनामानमेनमनघम्|
श्रीमानयं दिशितु सोमाननः सुखममानं सदा यतिपतिः
प्रेमातिभारधरभूमानवद्यमा तिधामादिसद्गुणगणः ||3||

कामारिदन्निहतकाम< सदा सुजनकामप्रदाननिपुणं
हे मानवा भजत सामादिवेदानुतभूमाधवं गुरुवरम्|
सीमातिरेकिमतधीमायिदर्पतृणधूमाग्निकल्पसुगिरं
हेमोदरप्रतिमधामानमाशु मम मे मानसामलतमम् ||4||

मन्यामहे सुमतिधन्यान्यदीयबुधमान्यांघ्रि पूजनरता-
नन्यानमान्यजडवन्यावनीजपशुजन्या समानकुजनीन् |

दुन्र्यायवादिकुलजन्ये गिरामिह सुजन्ये रतान् गुरुवरान्
सन्न्यायसंविजितदुर्मायियोधवरमान्यान्नुमो यतिवरान् ||5||

वंदारुभक्तजनवृंदारकेंद्रवनमंदारकल्पलतिका-
वृंदायमानमरविंदायताक्षमुरुविंदूरसालिविनुतम् |
बंदीकृतक्षितिपवृंदं मरंदमधुमंदीकृतोपमगिरं
वंदे गुरुं कुमतिमंदाक्षकारिधियमिंदुं त्रितापहरणे ||6||

पायादयं गुरुपायादनारतममेयामलात्ममहिमा
मायातमोहरणगेयार्यमा गुणनिकाय्यो महायतिवरः |
देयादभिष्टमनपायां रतिं भवभयाततापहरणे
ध्येये निजे पदि कुजायात्मजादिघनहेये न यापयतु सः ||7||

पुष्टिं करोतु मम कष्टं सुपिष्टयतु तुष्टः स्तवेन सततं
प्रेष्ठप्रदो~स्तु परमेष्टो गुरुर्मम वरिष्ठः सुतापसततेः |
दुष्टोग्रमायिमतपिष्टीकृदष्टगुणजुष्टं वदंतमपि यो
भ्रष्टं सुपिष्टयति तुष्टं गुणैर्हरिमदुष्टं कुतार्किकमयम् ||8||

अर्वदाटीसुवृत्तेन सर्वपद्यात्मकैस्तवैः |
कल्लापुराण्णय्याख्येन रचितैस्तुष्यतां गुरुः ||9||

श्रीराघवेंद्रस्तवरत्नमामा

कंठे जनैः सद्भिरियं विधार्यते |

अवाप्यते तैः सुदृढा सदेष्टा

संतानसंपत्ततिरत्र शीघ्रम् ||10||